ष्टकृतमित्यादि सूर्यग्रहे चंद्रस्थाने अमुकसंख्याकार्कसमिदाज्यचरुंति
लाहुतिभिरितिवदेत् । एवमन्वाधाय प्रणीताप्रणयनांतं कृत्वा त्रिभ्यो
अमुष्मै त्वेति चतुरश्चतुरो मुष्टीन्निरूप्यं चरुं श्रपयित्वा । आज्यभागां
तं कृत्वा ततः यजमानो दक्षिणत्तो देवतामुद्दिश्य त्यज्येत् । ततोन्वाधा

श्री

नक्रमेणजुहुयुः॥ ततः तिसृणां दूर्वाणामेकैकाहुतिः समिधश्चत्रिमध्वक्ताः
कार्याः ततः स्विष्टकृदादि पूर्णाहुत्यंतं प्राग्वत् ॰ ततआचार्य एकस्मिन्कलशे
जलपूर्णे पंचगव्यानि पंचपल्लवसर्वौषधिकल्कं दूर्वांकुरांश्च निक्षिप्य सव्रं
त्विकः॥ दंपती पूर्ववदभिषिंचेत्॥ एभिर्मंत्रैः॥ आपोहिष्ठा॥॰ इमंमेगंगे॰।
तत्वायामि॰ समुद्रज्येष्ठा इत्यादयः॥ सुरास्त्वेत्यादि॰ ततः स्नानं॰ दक्षिणा
दानं॰ प्रतिपादनादि पूर्ववत्॥ यदानुपूर्व॰ शांतिसमुच्चयः॥ तदाकालेक्य
कैर्वै स्याप्याग्नेयादिवत् तत्र प्रयोगः॥ ततोयजमानो देशकालौस्मृत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मम पत्न्याः प्रथमरजोदर्शने अमुकदुष्टमासतिथ्यादि अमुकग्रहसूचितेत्यादि
संकल्प्यर्त्विक्पूजांते विदध्यात्॥ तत आचार्यः भुवनेश्वर्यादिपूजांते प्राक्
पश्चाद्वा ततः उदीच्यां चंद्रादिकान् संपूज्य यथोपक्रमं निर्वापहोमाभिषेका
न् कुर्यादिति विशेषः॥ अन्यत्सर्वं समानं॥ ॥ इति ग्रहणरजोदर्शनशांतिः
॥ अथ विछिन्नस्य गृह्याग्नेः पुनः संधानं॥ आचम्य प्राणानायम्य देश
कालौ संकीर्त्यैतावंतं कालं गृह्याग्निविछेदजनितप्रत्यवायपरिहारद्वारा
श्रीपरमेश्वरप्रीत्यर्थं अमुकप्रायश्चित्तं अमुकप्रत्याम्नायद्वारा यथाशक्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथाकालं करिष्ये॥ पुनःअग्निविछेदनलुप्तानां सायंप्रातर्होमानां तथाद
र्शपौर्णमासस्थालीपाकानांच यथाशक्ति व्रीह्यादिरूपंद्रव्यंआज्यंच
नानानामगोत्रेभ्यो ब्राह्मणेभ्यः दातुमहमुत्सृजे॥ पूर्वोच्चरित॰विछिन्न
स्यगृह्याग्नेः पुनःसंधानमहंकरिष्ये॥ तदंगंस्थंडिलादिअग्निध्यानांतं
कृत्वा॥ अस्मिन्गृह्याग्निविछिन्नहोमे देवतापरिग्रहार्थमन्वाधानंकरि
ष्ये॥ अस्मिन्नन्वाहितेग्नाविध्मादि आघारांतंकृत्वा अत्रप्रधानं॥ अग्निं
पवमानंत्रिः॥ अग्निं॥ प्रजापतिंच आज्येन॥ अर्यमाग्निं वरुणाग्निं पूषाग्निं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रजापतिंचलाजद्रव्येणचतुर्वीरंसूर्यासावित्रींआज्येनशेषेणस्विष्टकृतमित्यादि
सद्योपक्ष्ये।।परिसमूहनादिप्राकृतंपात्रासादनेविशेषः प्रोक्षणींस्रुवंप्रणी
तापात्रमाज्यपात्रंलाजशूर्पमिध्मंबर्हिश्च दधिप्राशनपक्षेदधिपात्रंचासा
दयेत्।।आज्यसंस्कारादि आघारांतंकृत्वाप्रधानाज्याहुतीर्जुहुयात्।।अग्न ४३
यायूंषीतितिसृणांसूक्तंवैखानसाऋषयः अग्निः पवमानोदेवता।गाय
त्रीछंदः।गृह्याग्निपुनःसंधानाज्यहोमेवि०।।अग्नआयूंषि० अग्निर्ऋषिः
अग्नेपवस्व।।०स्वाहा।।अग्नयेपवमानायेदं०।।सर्वत्रत्यागः।।त्वमर्यमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वसुश्रुतोग्निस्त्रिष्टुप्॰ गृह्याग्नि॰। ॐ त्वमर्यमाभव॰। अग्नयइदं॰ प्रजापते
हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्। पुनःसंधा॰ प्रजापतेन॰ प्रजापतयइदं॰
अथ पत्न्याः प्रक्षालितेनजलेन पत्तिराज्येनो पस्तीर्यद्विर्लाजानोप्य पंचाव
त्तीनुत्तिराप्य शूर्पस्थानभिघार्यांजलिस्था नप्यभिघार्यत्तिष्ठन्तीं दंपत्योः
अंजलिं स्वकराभ्यां धृत्वा अर्यमणं वरुणं पूषणमिति तिसृणां वामदेव
ऋषिः अर्यमाग्निर्वरुणाग्निः पूषाग्निर्देवताः अनुष्टुप्छंदः गृह्याग्निपुनः
संधानलाजहोमविनियोगः। अर्यमणं नु देवं॰ ॐ अर्यमाग्नयइदं॰।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वरुणंनुदेवंकन्याअग्निमयक्षत • सइमां • वरुणग्नय इदं • पूषणंनुदेवं • पूषाग्नय
इदं • शूर्पपुटेनशिष्टान्लाजान्हुत्वाप्रजापतयइदं • आनः प्रजामितिचतसृणां
सूर्यासावित्रीआद्याजगतीयात्रिष्टुप् • द्वेअनुष्टुभौ • गृह्याग्निःपुनःसर्वत्रसू
र्यासावित्र्या इदं • समंजंत्विति अस्यसूर्यासावित्रीसूर्यासावित्र्यनुष्टुप् । दधि
प्राशने • समंजंतुविश्वे • अनेनमंत्रेणस्वयंप्राश्यपत्नीमपिप्राशये
त् । आज्यशेषेणवाहृदयांजनंकुर्यात् ।। ततः आज्येनस्विष्टकृदादिहो
मशेषंसमाप्य ।। ।। इतिपुनःसंधानप्रयोगः ।। ।। उपलेपादिकंकुर्या

दाघारांतं विवाहवत्॥ विवाहाङ्ग्या हुती हुत्वा लाजहोमो भवेदिह॥ गृहप्र
वेशनीयाख्य हुत्वास्या हृदयांजनं॰ परिणीत्यादिनास्यत्रलाजाना वप
त्तिस्वयं॰ समानतंत्रेकं चेह होमद्वयमिदं भवेदिति कारिकाः॥ अथग
र्भाधानं॥ रजोदर्शनात्षोडशाहोरात्राणि ऋतुस्तन्मध्ये आद्यं रात्रिचतु
ष्कं पर्वादिच निषिद्धदिनानि वर्जयित्वा मघामूलव्यतिरिक्तेषु भेकाले
दंपत्योश्चंद्रानुकूल्ये गर्भाधानं कार्यं॥ तत्रापियुग्मासु रात्रिषु पुत्राः॥
अयुग्मासु कन्याजायंते इत्यादि ज्ञेयं॥ आचम्य॰ प्राणानायम्य देश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८५

कालौ संकीर्ये ॥ अस्याममभार्यायाः प्रतिगर्भसंस्कारातिशयद्वारास्यांजनिष्य
माणसर्वगर्भाणांबीजगर्भसमुद्भवैनोनिबर्हणद्वाराश्रीपरमेश्वरप्रीत्यर्थं
गर्भाधानाख्यंकर्मकरिष्ये ॥ गणेशपूजनंपुण्याहवाचनंमातृकापूजनंनां
दीश्राद्धंकरिष्ये ॥ समिद्द्वयमादाय ॥ गर्भाधानंकर्तुंप्राजापत्याहोमंकरि ८५
ष्ये ॥ तत्रदेवतापरिग्रहार्थमित्यादिचक्षुषीआज्येनेत्यंतमुक्त्वा प्रजा
पतिंचरुणा ॥ विष्णुंषड्वारमाज्येना ॥ प्रजापतिंचाज्येनशेषेणस्विष्टकृ
तमित्यादिपूर्णपात्रनिधानांतंकृत्वा ॥ प्रजापतयेत्वाजुष्टंनिर्वपामी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्या दि आज्यभागांतं कृत्वा अवदानधर्मेण अवदाय ॐ प्रजापतये स्वाहेति चरु
लेकमाहुतिं हुत्वा ॥ विष्णुर्योनिमिति तिसृणां त्वष्टा विष्णुरनुष्टुप्. गर्भा
धानप्रधानाज्यहोमे विनियोगः ॥ ॐ विष्णुर्योनिं. स्वाहा । गर्भं धेहि
सि. हिरण्ययी अर. नेजमेषेति तिसृणां त्वष्टा विष्णुरनुष्टुप्. गर्भाधा
नाज्य. ॐ नेजमेष परापत स्वाहा । यथेयं पृथिवी मह्युः सूत वे स्वाहा
विष्णोः श्रेष्ठेन रू. वे स्वाहा । सर्वत्र विष्णव इदं न ममेति योगः प्रजाप
ते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् । गर्भाधानप्रधानाज्याहुतिहोमे.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रजापतेनत्व॰ स्वाहा॥ एवं समस्ताहुतीर्हुत्वा॰ अपनः शोशुचदित्यस्य सूक्तस्य कु
त्सोग्निर्गायत्री॰ पत्न्याम् ऊर्ध्वाभिमर्शने विं॰ ॐ अपनः शो॰ याः फलिनीरित्य
स्य अथर्वणो भिषग्गोषधयोनुष्टुप्॰ जपे विं॰ याः फलिनी॰ वधेनदस्युमि
ति षण्णां वसुश्रुतोग्निस्त्रिष्टुप्॰ अग्न्युपस्थाने विं॰ ॐ वधेन दस्युं प्र॰ अ
ग्निस्तु विश्ववस्तममितिद्वयोः वसूयवोग्निरनुष्टुप्॰ अग्न्युपस्थाने॰
अग्निस्तु वि॰ अग्निर्ईहाति॰ इत्यष्टाभिरग्निमुपस्थाय स्विष्टकृदादि होम
शेषं समाप्य॥ सूर्योनो दिवस्पात्विति पंचर्चस्यस्य सूक्तस्य चक्षुः सूर्योगा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्री॰ सूर्योपस्थाने॰ सूर्योनोदिवस्या॰ अनेनसपत्नीकः सूर्यमुपस्थाय॰
अश्वगंधाकल्कं दूर्वाकल्कं वासःक्षमवस्त्रे निक्षिप्य उदीर्ष्वेतिद्वयोः सूर्यासा
वित्रीसूर्यासावित्रीआद्यात्रिष्टुप्॰ द्वितीयानुष्टुप्॰ भार्यायादक्षिणनासा
पुटे अश्वगंधारससेचनेवि॰ उदीर्ष्वातः पतिवती॰ सज्ञस्वाहा॥ ॐ गंधर्व
स्यविश्वावसोमुखमसीतिमंत्रेण होमोत्क ऋष्यादिभिः विष्णुर्योनिमिति
तिसृभिः॰ नेजमेषेतितिसृभिः त्रिभिरंगुलीभिर्योनिमभिमृश्य तांपूषन्नि
त्यस्यसूर्यासावित्रीसूर्यासावित्री त्रिष्टुप्॰ जपेविनियोगः॥ तांपूषन्॰ यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२०

गर्भमित्यस्य वसिष्ठ पर्जन्यो निचृद्गायत्री॰ जपे विनियोगः॥ यो गर्भमोषधी॰ अहं
गर्भं प्रजावान्प्राजापत्यो गर्भं इंद्रो वा त्रिष्टुप्॰ जपे वि॰ अहं गर्भ॰ इति त्रीन्मंत्रान्जं
पित्वा॰ सकृदुपगच्छेत्॥ ततः प्राणे रेतो दधाम्यमुकशर्मा॰ यथा भूमिरग्निग
र्भा यथा द्यौरिंद्रेण गर्भिणी॰ वायुर्यथा दिशां गर्भ एवं ते गर्भं दधाम्यमुकश
र्मेति प्रथमां नेत्स्वनामवदेत्॥ स्त्रीत्हृदयमभिमृश्याचामेत॥ इदानीं शि २७
ष्टानस्य दक्षैवस्विष्टकृदादिहोममंत्राणां समापयंति॥ कृतस्य गर्भाधानाख्य
स्य कर्मणः सांगतासिध्यर्थं यथाशक्ति ब्राह्मणान्भोजयिष्ये॥ तथैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शनद्वाराप्रतिगर्भंबीजगर्भसमुद्भवैनोनिबर्हणजनकातिशयद्वाराचश्री
परमेश्वरप्रीत्यर्थंस्त्रीसंस्काररूपंपुंसवनानवलोभनसीमंतोन्नयना
ख्यानिकर्माणिकरिष्ये॥ गणेशपूजनाभ्युदयिकानितंत्रेणकुर्यात्॥ तदु
क्तं। ब्रह्मपुराणे॥ गणेशः क्रियमाणानां मातृभ्यः पूजनं सकृत्॥ सकृदेव
भवेच्छ्राद्धं मादौनपृथगादिषु॥ ततोविधिवदौपासनाग्निंपवमानसं
ज्ञंप्रतिष्ठाप्य अद्यक्रियमाणपुंसवनानवलोभनसीमंतोन्नयनहोमदे
वतापरिग्रहार्थमन्वाधानंकरिष्ये॥ अस्मिन्नन्वाहितेग्नौ इध्मादिबर्हिषु

४९ षीआज्येनेयंतमुक्त्वा।प्रजापतिंचरुद्रव्येणद्विधात्तारंद्विःराकांतिःस्विष्टं
प्रजापतिंचोज्यद्रव्येणन्नाषेणस्विष्टकृत्तामित्यादिप्रणीत्ताप्रणयनांते
कृत्वा॥प्रजापतयेत्वाजुष्टंनिर्वपामीतिचतुरोव्रीहिमुष्टीन्निरूप्यहविरासा
दनांतंकृत्वा॥स्वदक्षिणतःप्राग्ग्रीवमु।स्तोमानडुहंचर्मास्तीर्यआस्मान ४९
मग्निंचांतरापत्नीमाचांतसत्तिलामानीयचर्मण्युपनेद्रूयपत्नीमुपवे
श्यनयान्वारब्धइध्माधानादिआज्यभागांतंकृत्वाप्रक्षालितेप्रसृतिद्व
तेपत्नीपाणोप्रसृतिमंतंगोदेधिनिक्षिप्य॥तदुपरिलिंगवत्तयवंन्त
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्वेयोः अंउवत्तमाषद्वयंच निधाय।। किंपिबसिति: पत्नीं पृच्छेत्। साच पुंस
वनं इति त्रिरुक्तानि: ग्रोषंपीत्वा जलं चाचम्य पुनरेवं द्विः ततः पत्न्या दक्षि
ण नासाबिले दूर्वारसं निषिंचेत्।। तत्र प्रजावदारव्यसूक्तं।। ॐ आते
गर्भो योनिमैतु पुमान्बाणइवेषुधिं आवीरो जायतां पुत्रस्ते दशमा
स्यः करोमि ते प्राजापत्यमा गर्भो योनिमैतु ते अनूनः पूर्णो जायतां
मश्लोणो पित्राच धीमतः पुमांस्ते पुत्रो नारि तं पुमाननुजायतां ॰ता
नि भद्राणि बीजान्यृषभा जनयंति नौ। यानि भद्राणि बीजान्यृषभा जन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यंतुनः त्तैस्त्तंपुत्रान्विंदस्वसाप्रसूर्धेनुकाभव·कामःसमृध्यतांमह्यमप
राजित्तमेवमे·यंकामंकामयेदेवतन्मेवायोसमर्धय·।।अथजीवपुत्रा
रव्यंसूक्तं।।अग्निरैतुप्रथमोदेवतानांसोस्यैप्रजांमुंचतुमृत्युपाशात्।
तदयंराजावरुणोनुमन्यतांयथेयंस्त्रीपौत्रमघंनरोदात्।।इमामग्नि ५०
स्त्रायतांगार्हपत्यःप्रजामस्यैनयतुदीर्घमायुः अशून्योपस्थाजीवता
मस्तुमातापौत्रमानंदमभिप्रबुध्यतामियं।मातेगृहेनिशिघोषउत्था
दन्यत्रत्वद्रुदंत्यःसंविशंतु·मात्वंविकेस्युरआवधिषजीवपत्नीपति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोके विराजं पत्युर्यं तीप्रजांसुमनस्यमाना। द्यौस्ते पृष्ठं वायुरूरू अश्विनौ
चस्तनं धयंतं सविताभिरक्षतु॥ आवाससः परिधानाद्बृहस्पतिर्विश्वे
देवा अभिरक्षंतु पश्चात्॥ अप्रजस्तां पौत्रमृत्युं पाप्मानमुत वाघं। शीर्ष्णः
स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुंचामि पाशं॥ देवकृतं ब्राह्मणं कल्पमानं
टी तेन हन्मि योनिषदः पिशाचान्। क्रव्यादो मृत्यून धरान्पातयामि दीर्घमायु
स्तव जीवंतु पुत्राः। एतैर्देवाभिमंत्रैर्नस्यदत्ते आचांतमलमापह्यास्यष्टः।
तत्तअवदानधर्मेण वदाय प्रजापतये स्वाहेत्येकामाहुतिं कृत्वा। यत्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५१

सुजीमइत्यस्य हिरण्यगर्भः प्रजापतिरनुष्टुप्। भार्यायाहृदयालंभनेवि॰ ॐय
त्तेसुशीमेहृदयेहितमंतः प्रजापतौ॰ मन्येहंमांतद्विद्वांसंमाहंपौत्रमघंनि
यां। धातादधातुदाशुषइतिमंत्रद्वयस्यहिरण्यगर्भोधातानुष्टुप्। द्विती
यात्रिष्टुप्। सीमंतोन्नयनप्रधानाज्यहोमेवि॰ ॐधातादधातु॰ वतःस्वा
हा॥ धाताप्रजानामु॰ जुहोतस्वाहा। धात्रइदं॰ राकामहमितिद्वयो गं स
मदोराकाजगती। सीमंतोन्नयनप्रधानाज्यहोमेवि॰ ॐ राकामहंसुहं॰
राकायाइदं॰ ॐयास्तेराके॰ राकायाइदं॰ नेजमेषेतितिसएणात्वष्टाविष्णु ५१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रनुष्टप्।। सीमंतोन्न॰ ज्यहो॰ नेजमेषपरा॰ यथेयंपृथिवी॰ विष्णोश्रेष्टेन॥॰
सर्वत्र विष्णवद्दं॰ प्रजापतेनत्व॰ ततः पत्न्याः पश्चिमतः प्राङ्मुखस्ति
ष्टन् अपक्कमोदुंबरस्तबकद्वयंत्रिः शुक्लांशल्लीकुशांकुरत्रयंचैकीकृत्य
तन्मूलेनपत्न्याः केशललाटयोः संधिमारभ्यमूर्द्धप्रदेशान्त॥ भूर्भुवः स्व
रोमितिमंत्रेण त्रिश्वत्नुर्वारंवाप्रस्फुन्नयनमंत्रमावर्तयंसीमंतमुन्न
यत्॥ भूर्भुवः स्वरित्तिमंत्रस्यप्रजापतिः प्रजापतिर्बृहती॰ सीमंतव्
हने वि॰ सोमंराजानंसंगायेतां॰ इतिप्रेषयेत्॰ तोच॰ ॐ सोमानोराह्वावे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५२

लुमानुषीः प्रजा निविष्टवत्सुगंगे इत्यादि समीपनद्याः संबंध्यं तं नामनिर्दिश्य तौ
वीणया गायेतां० सामगाना परिज्ञाने मंत्रमात्रं त्रिः पठेतां। ततः स्विष्टकृदादि
होमशेषं समाप्य० कृतानां पुंसवनानवलोभनसीमंतोन्नयनकर्मणां सांग
तासिध्यर्थं ब्रह्मणे अनडुहं तत्प्रतिनिधिभूतं यथाशक्ति द्रव्यं दातुमहमु
त्सृजे० ब्रह्माभावे ब्राह्मणेभ्यो दास्ये० कृतानां कर्मणां सांगतासिध्यर्थं य ५२
थाशक्ति ब्राह्मणान् यथाकालं भोजयिष्ये।। यथाशक्ति भूयसीं दक्षिणां
य दातुमहमुत्सृजे० यस्यस्मृत्यादि विष्णुस्मरणं कार्यं।। ततः ब्राह्मणेभ्यश्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वृद्धाजीवपत्योजीवप्रजापद्यद्रुपदेशेयुः तत्तत्कुर्युः॥ ॥इतिपुंसवना
नवत्सोभनसीमंतोन्नयनानांप्रयोगः॥ पुत्रेजातमात्रेपितातस्यमुखंनि
रीक्ष्य॰नद्यादावुदङ्मुखःस्नात्वा॰असंभवेदिवाहृताभिःशीताभिरद्भिःसु
वर्णयुताभिर्गृहएवस्नात्वाआचम्यप्राणानायम्यदेशकालौसंकीर्त्यममा
स्यकुमारस्यगर्भांबुपानजनितसकलदोषनिबर्हणायुर्मेधाभिवृद्धिबी
जगर्भसमुद्भवैनोनिबर्हणद्वाराश्रीपरमेश्वरप्रीत्यर्थंजातकर्मकरिष्ये।
इतिसंकल्प्य॰।तदंगंगणपतिपू॰हिरण्येननांदीश्राद्धंकृत्वाततोविषम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानेन मधुसर्पिषी मिश्रीकृत्य शिलातले निक्षिप्य सुवर्णेनावघृष्य । सुवर्ण
भाजने निक्षिप्य । ॐ प्रते ददामि मधुनो घृतस्य वेदं सवित्रा प्रसूतं मघोनां । आ
युष्मान् गुप्तो देवताभिः शतं जीव शरदो लोके अस्मिन् । इति मंत्रेण तेनैव
हिरण्येन कुमारं पाययित्वा । तद्धिरण्यं प्रक्षाल्य दक्षिणकर्णे निधाय तन्मु
खसमीपस्वमुखमानीय ॐ मेधां ते देवः सविता मेधां देवी सरस्वती । मे
धां ते अश्विनौ देवावाधत्तां पुष्करस्रजौ इति ऋचं जपित्वा । पुनस्तद्धिरण्यं
सव्यकर्णे निधाय एतामेव ऋचं जपेत् ॥ ततः शिरस्घ्राणं सोयुगपदभिमन्त्रयेत् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ अश्माभवपरशुर्भवहिरण्यमस्तृतंभव॰वेदोवैपुत्रनामासिसजीवशरदः
शतं॰इंद्रश्रेष्ठानिद्रवि॰असमेप्रयंधिमघवन्नृः इतिमंत्राभ्यांचाभिमर्शेत॰त
तोरक्षायुषोरभिवृद्ध्यर्थंअंगादंगात्संभवासिहृदयादधिजायसे॥आत्मा
वैपुत्रनामासिसजीवशरदःशतं॥ततःस्नातःकरिष्यमाणेतद्देवनाम
स्मरेत्॥यथाचारंहिरण्योदकेनमातुर्दक्षिणस्तनंप्रक्षाल्य॰॥इमां
कुमारोजरांधयन्तुदीर्घमायुःअस्यैस्तनौप्रयुंजानाभ्युर्वर्चोमनूनोबल
मितिमंत्रेणमात्राकुमारंपाययित्वा॰तमेवंतेनसोत्तिपंचभि॰आशिषः

५४ कृतस्य कर्मणः सांगतासिध्यर्थं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो यथाशक्ति भूयसीं
दक्षिणां दातुमहमुत्सृजे॰ रात्रौ संध्यायां ग्रहणे जातानां शौचांतर मध्येपीदं
कार्यं॥ मृतानां शौच मध्ये जातस्य तदैवाशौचांतं कार्यं॰ पितृ त्रियामांतरं ग
ज्ये ते पिपितव्यादि गोत्रजोष्टं कर्मणेदं कुर्यात्॥ ॥इति जातकर्म॥ ॥पंच
मषष्ठच दिने पूर्वरात्रे पित्रादि॰ ॥आचम्य प्राणानायम्य देशकालौ स्म ५४
त्वा॰॥अस्य शिशोः शरीरारोग्यसकलारिष्टशांति द्वारा श्री परमेश्वरप्री॰
विघ्नेशस्य जन्मदानां षष्ठी देव्याजीवंतिकायाश्च यथामिलितोपचारैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूजनं करिष्ये ।। षोडशोपचारैः तंत्रेण पूजां कृत्वा ।। एतत्प्रतिमाभ्यानुलेपना
दिना स्त्रिया कुंडले खनीयाः ।। पीतादौ नाः अक्षतपुंजरूपेण निवेश्याः पुरु
षाः ।। शस्त्रहस्ताः स्त्रियश्च नृत्यगीतकारिण्यः ॥ अस्यां रात्रौ जागरणं कार्यं
सूतिकागृहं च सधूमाग्निदीपशस्त्रमुसलांबुविभूतियुतं कार्यं । सर्षपांश्च
सर्वतो विकिरेत् ।। जननाशौचमध्ये प्रथमषष्ठदशमदिनेषु दाने प्रतिग्र
हे च न दोषः ।। अन्नं तु निषिद्धं ।। षष्ठी प्रार्थना । गोरीपुत्रो यथा स्कंदः शिशुत्वे
रक्षितः पुरा ।। तथा ममाप्ययं बालः षष्ठिके रक्ष्यतां नमः ।। कार्त्तिकेय महा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षोडशादिने द्वाविंशतिदिने द्वा
त्रिंशतिदिने

५५ बाहो---पनंदन॥ कुमारं रक्ष भीतिभ्यः पाहि देव नमोस्तु ते॥ शक्तिस्त्वं सर्व
देवानां लोकानां हितकारिणी॥ मातर्बालमिमं रक्ष महाषष्ठि नमोस्तु ते॥
॥ ॥इति षष्ठीपूजा॥ ॥जन्मतः एकादशे वा यथाचारं नियतदिने वा नाम
करणं कार्यं॥ नियतकालेपि विष्टिवैधृतिव्यतिपातग्रहणसंक्रांत्यमावा
स्याश्राद्धदिनेषु न कार्यं॥ नियतकाले क्रियमाणे गुरुशुक्रास्तबाल्यवार्द्धक ५५
वक्रातीचारमलमासादिनिषेधो नास्ति॰ नियतकालातिक्रमे तु ज्योतिः
शास्त्रोक्ते शुभे काले कार्यं॰ सर्वथात्र पूर्वाह्णः प्रशस्तः॥ आचम्य प्रा
णानायम्य देशकालौ संकीर्त्य मोऽस्य मम कुमारस्य नामाहं विद
धामि॥ नैर्विधीयतां॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ण नायमम्य देशकालौ स्मृत्वा अस्य शिशो बीजगर्भसमुद्भवैनोनिबर्हणायु
र्वृद्धिव्यवहारसिद्धिद्वारा श्रीपर० नामकरणं करिष्ये ।। गणेशपूजनादि
नांदीश्राद्धं कृत्वा० ।। नामलेखनं कार्यं० अत्रादौ गणपतिनाम० ततः
स्वकुलदेवतानाम० तदनंतरं मासनाम तच्च० कृष्णोऽनंतोऽच्युतश्चक्री वै
कुंठोथ जनार्दनः ।। उपेंद्रयज्ञ० पुरुषो वासुदेवस्तथा हरिः । योगीशः पु
ण्डरीकाक्षो मासनामान्यनुक्रमात् ।। चैत्रादि मार्गशीर्षादि वा क्रमः तत
तो नक्षत्रनाम० ततो व्यावहारिकं नाम द्व्यक्षरं चतुरक्षरं नाम लेख्यं विप्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५६ दि वुर्णक्रमेण शर्म वर्म गुप्त दासान्यतम पदांतमुपांशु कुर्यात्त ।। तच्चमौंजीबं
धनान्माता पितरावेव जानीयातां ० उपनयनकाले चानेन नाम्नाभिवाद
येत्त ।। इति कुमारं प्रति वाच्यं ।। अत्रायं शिष्टाचारः ।। तंडुलान्कांस्यादिपा
त्रे प्रसार्य तदुपरि सुवर्णशलाकया आदौ गणपति नाम कुलदेवता प्रयु ५६
क्तनाम अमुकभक्तइति लेख्यं ।। ततो मासनाम ० ततो नक्षत्र नाम ० त
तो व्यावहारिकं स्वेष्टनामशर्मांतं लिखित्वा ० तदस्त्के ० गृहावेषु ० नाम
देवताभ्यो नमः ।। इति उपचारैः पूजां कुर्यात्त ।। मंत्रपुष्पांजलिं ० कर्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिशोर्दक्षिणकर्णे नामानि कथयेत्॥ कुलदेवतानाम्ना त्वममुकभक्तो
सि० ॥ मासनाम्ना त्वं कृष्णोसि० नक्षत्रनाम्ना त्वं चूडामणिरसि० व्यावहा
रिकेण नाम्ना त्वं नारायणशर्मासि० ततो ब्राह्मणहस्ते अक्षतान् दत्वा०
कुलदेवतानाम्नायं दुर्गाभक्तो भवतः सर्वान्ब्राह्मणानभिवादयेत्० ते
च प्रतिनाम्ना आयुष्मान्भव त्वममुक इति वदेयुः० तदस्य० गृहा० सुप्रतिष्ठि
तमस्तु इति विप्रा वदेयुः॥ ततो यथाशक्ति ब्राह्मणभोजयेत्॥ भूयसीद
क्षिणां दद्यात्॥ कुमार्या अपि नामकरणममंत्रकं कार्यं॥ विषमाक्षरं तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५८

तन्नाम॰ विप्राशिषो ग्राह्याः ॥ अत्र जातकर्मवत्पित्राद्याः क्रमेण कर्त्तारः ॥ ॥ इति ना
मकरणं ॥ ॥ जन्मतः षष्ठेमासि अष्टमे वा दंतेषु जातेषु वा॰ ज्योतिः शास्त्रोक्त
तिथिनक्षत्रादिशुभकाले पूर्वाह्णे पित्रादिर्शिशोरन्नप्राशनं कुर्यात ॥ ष
ष्ठेमासि चेत्तदा गुरुशुक्रपौष्याद्यादिदोषाधिकमासादिदोषश्च नास्ति॰ ॥ ततः
देशकालौ स्मृत्वा ममास्य शिशोर्मातृगर्भमलप्राशनशुद्ध्यन्नाद्यब्रह्मवर्च
सतेजइंद्रियायुर्लक्षणफलसिद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वाराश्री॰
र्थं उपवेशनान्नप्राशनं तंत्रेण करिष्ये ॥ गणेशपूजनादि नांदीश्राद्धांतंकृ

५८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वा॰ वराहपृथिवीदेवद्विजगुरुदेवताः पूजयित्वा॰ तत्रमंडलंकृत्वा॥ वराहपृथिवीदेवद्वि
जगुरुदेवताः पूजयित्वा॥ तत्रमंडलंकृत्वा॥ धान्यराशिंकृत्वा॰ शंखतूर्यादिमाग
लिकध्वनौक्रियमाणेशिशुमुपवेशयेत्॥ एतैर्मंत्रैः। रक्षैनंवसुधेदेविसदासर्व
गतंशुभं॰ आयुःप्रमाणंनिखिलंनिक्षिपस्वहरिप्रिये॥ आचिरादायुषस्त्वस्य
येकेचित्परिपंथिनः। जीवितारोग्यवित्तेषुनिर्दहस्वाचिरेणतान्॥ धारिण्यशे
षभूतानांमातस्त्वमधिकाह्यसि॥ कुमारंपाहिमातस्त्वंब्रह्मातदनुमन्यतां॥ त
दग्रेपुस्तकशस्त्रवस्त्रादिशिल्पानिविन्यस्यजीविकापरीक्षांकुर्यात्॥ शिशुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वेछयाय स्वथमंस्पृष्टो तू ।। सास्यजीविकेति विद्यात् ।। दधिमधुघृतमिश्रमन्नं सुवर्णे
दिपात्रे निधाय ।। अन्नपतइ सस्य नलकूबरोन्नपतिर्जगती ।। त्रिशो रन्नप्राशनेवि०
अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः ।। प्रप्रदातारंतारिषतुर्जनोधेहिद्विप
दे चतुष्पदे ।। इतिमंत्रेणसुवर्णहस्तोन्नमादायप्राशयेत् ।। मुखंप्रक्षाल्य ।। अन
योस्रूपवेशनान्नप्राशनयोःकर्मणोःसांगतासिध्यर्थंब्राह्मणान्भोजयेत् ।। भू
यसीदद्यात् ।। कुमार्यो अप्येतदमंत्रकं किंतुसप्तमेमासि ।। ।। इति उपवेश
नान्नप्राशनयोगः ।। ।। अथ चौलं ।। ।। यजमानः प्राणानायम्य देशकालौ ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मृत्वा॰ अस्य कुमारस्य बीजगर्भसमुद्भवैनोनिबर्हणेन बलायुर्वर्चोभिवृद्धि
द्वारा श्रीपरमेश्वरप्रीत्यर्थं चौलाख्यं कर्म करिष्ये॥ गणेशपूजनं पुण्याहवाच
नं मातृकापूजनं नांदीश्राद्धं च कृत्वा॥ स्थंडिलादि अग्निध्यानांतं कृत्वा॥ अ
स्मिन् चौलाख्ये कर्मणि देवतापरिग्रहार्थं मन्वाधानं करिष्ये॥ अस्मिन्नन्वा
हिते ऽग्नौ इत्यादि॥ आघारावाज्येनेत्यंतमुक्त्वा॥ त्रिरग्निं पवमानं प्रजापतिं
चाज्यद्रव्येण शेषेण स्विष्टकृतमित्यादि पूर्णपात्रनिधानं ततः षट्पात्रप्रयो
गादि कुर्यात्॥ अग्नेरुत्तरतः व्रीह्यादिशरावचतुष्टयं निधाय॥ अग्नेर्दक्षिण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५९

तः॰ एकस्मिञ्शरावे शमीपर्णानि द्वितीये आनडुहं गोमयं एकविंशति कुशपिंजूलानि
आसादयेत्॥ कुमारेणान्वारब्धः आघारांतं कृत्वा॥ अग्न आयूंषीति तिसृणां श
न तं वैखानसा ऋषयः अग्निः पवमानो देवता॰ गायत्री छंदः। चौलकर्म प्रधानाज्य
होमे विनि॰॥ सर्वत्राग्नये पवमानायेदं॰ प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टु
प्। प्रधानाज्यहोमे॰ प्रजापतय इदं॰ ततः शीतमुष्णं चोदकं॰। उष्णेन वाय
उदकेनेहीति मंत्रेणायुपह्वारांग्र ह्रीत्वा नवनीतं दधि द्रप्सान्वाभिषिच्य कुमार
स्य वामकर्णमारभ्य प्रदक्षिणं ॐ अदितिः केशान्वपतु आप उंदंतु वर्चसे इति

५९

मंत्रेण मंत्रावृत्याशिरस्त्रिवारं क्लेदयेत्॥ पात्राणि कुशा पिंजूलान्यादाय दक्षिणक
र्णे मूलभागे निधाय॥ ॐ षधेत्रास्वैनं। अनेन कुशां क्षुरेणन्निधाय॥ स्वधिते मै
नं हिंसीः तदुपरि क्षुरं निधाय॥ येनावपत्सविता॥ सतृसकेशांछित्वा पूर्वा
ग्रानू शमीपर्णयुतानू मातृहस्ते दत्वा मात्रा गोमये परिनिधाय। पुनस्तथैव
मंत्रेण द्विवारं कार्यं। येन धाता। येन भूयश्च। सर्वैर्मंत्रैश्चतुर्थं एवं वामकर्णे
न तु चतुर्थं। यत्क्षुरेण मर्चयता सुपेशसा वप्ता वपसि केशानू। शुंधि शि
रो मास्यायुः प्रमोषीः। अग्रतश्चालभ्या मूलात्तुधारेण निमृज्येत्॥ ततः शी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तोष्णाभिरद्भिरवर्थं कुर्वाणो क्षुरएवन्कुन्तलीकुरु०। नापितं ब्रूयात्॥ नापितो यथाचा
रं शिखास्थापिवपनं कृत्वा शीतोष्णैः स्नायात्॥ स्विष्टकृदादिहोमशेषं समापये
त्॥ ब्रह्मणेऽनडुहस्त्वत्तिनिधिभूतं दक्षिणां दत्वा॥ ब्राह्मणान्भोजयित्वा। ना
पिताय व्रीह्यादिपात्रं चतुष्टयं दद्यात्॥ यस्य स्मृत्येति विष्णुं स्मृत्वा॥ एतत्स
र्वं कुमार्या अपि कार्यं अमंत्रकं होमस्तु समंत्रकः। इति। मध्ये शिरसि चू
डा स्याद्वात्रिंशष्ठानां तु दक्षिणे। उभयोः पार्श्वयोरत्रिकश्यपानां शिखाम
ता० शिरो मातरि गर्भिण्यां चूडाकर्मन कारयेत्॥ पंचमाद्वादश्योर्ध्वं तु गर्भि ६०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ण्यामपिकारयेत्॥सहोपनीयाकुर्यात्तत्तदा दोषोनविद्यते॥ ॥इतिचूडाक
र्मप्रयोगः॥ ॥यदिगर्भाधानसंस्कारलोपस्तदाप्रायश्चित्तंकृत्वाकालात्य
यनिमित्तंप्रायश्चित्तहोमंचकृत्वाचौलहोमःकार्यः।तदाहभगवान्॥
आरभ्याधानमाचौलात्कालेतीतेतुकर्मणां।व्याहृत्याज्यंतुसंस्कृत्यहुत्वा
कर्मयथाक्रमं।कार्यमित्तिन्नोषः।एतेष्वेकैकलोपेपिपादकृच्छ्रंसमाचरे
त्॥चूडायाअर्द्धकृच्छ्रंस्यादापदित्येवमीरितं॥अनापदितुसर्वत्रद्विगुणं
चरेत्॥मनुः।जातकर्मादिसंस्काराःस्वकालेनभवंतिचेत्।चौलादर्वाक्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रकुर्वीत प्रायश्चित्तादनंतरं। प्रायश्चित्तहोमे कृते तत्कर्म कृत्वा कृतं॥ कारिका॥ प्राय
श्चित्ते कृते पश्चाद्दत्तीनमपि कर्म वै॥ कार्यमित्येक आचार्या नेत्यन्ये तु विपश्चितः॥
प्रायश्चित्तहोमस्तु प्रधानहोमात्पूर्वं समस्ताभिर्व्याहृतिभिः प्रतिकर्म विलोम
कैकाऽन्या हुतिः कार्या॥ अथोपनयनं॥ माघादिपंचमासेषु मेखलाबंधनं
शिशोः॥ ज्येष्ठमासेन ज्येष्ठस्य जन्ममासेन सर्वेषां शुक्लपक्षे द्वितीयादिस्वा
ध्यायतिथिषु॥ नानध्याये न नैमित्तिकानध्याये। पूर्वाह्णे शुभमुहूर्ते शुभचं
द्रादौ गुरुशुक्रयोर्बाल्यवार्द्धकास्तराहित्यादौ ज्योतिर्विदोक्ते शुभे काले उप ६१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नयनं कार्यं उपनयने तु क्रममाह ॥ वृद्धगर्गः ॥ पिता पितामहो भ्राता ज्ञातयो गो
गोत्रजाग्रजाः ॥ उपायनेधिकारी स्यात्पूर्वाभावे परः परः ॥ तथा ॥ पितैवोपन
येत्पुत्रं तदभावे पितुः पिता ॥ तदभावे पितुर्भ्राता तदभावे तु सोदरः ॥ अ
थाधिकारसिद्धये प्रायश्चित्तमाह ॥ वृद्धविष्णुः ॥ कृच्छ्रत्रयं चोपनीतात्रीन्कृ
च्छ्रांश्च बटुश्चरेत् ॥ आचार्यो द्वादश सहस्रगायत्रीं चजपेत् ॥ तथा नांदीश्रा
द्धे कृते पश्चादनध्यायस्त्वकालिकः ॥ मौंजीबंधं तदा कुर्याद्वेदारंभं न कार
येत् ॥ अकालिको गर्जनिर्घातादिनिमित्तकः ॥ आश्वलायनानामुपनयन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६२

दिनेवेदारंभाभावाद्देदारंभकरणंयजुर्वेदविषयं॥ आश्वलायनस्तु। वृद्धिश्राद्धदिना
षट्दिनमध्येमुहूर्त्तांतरेनैवनांदीश्राद्धंनतत्रोपनयनंकुर्यात्॥ तदूर्ध्वंतुमुहूर्ते
श्राद्धांतरपूर्वकमुपनयनंयथाकालंकुर्यात्॥ ॥उपनयनप्रयोगः॥ ॥उक्तकाले
उपनिनीषुराचार्यः॥ पूर्वेद्युर्बटोःपरिधानार्थंशुक्लमीषद्धौतंनवंसदशंपरेण
नधृतंवस्त्रमुत्तरीयार्थंचकाषायवस्त्रमजिनंवाकृष्णमृगस्य। यज्ञोपवीतंमौं
जीमेखलांचपालाशमब्रह्मण्ये त्वजं सौम्यदर्शनंबटोःकेशसंमितंसाग्रंदंडंकौ
पीनंतद्बंधनसूत्रंभिक्षाभाजनंचसंपाद्य॥ ममोपात्तेत्यधिकारसिध्यर्थं

६२

कृच्छ्रत्रयं द्वादशसहस्रं गायत्रीजपं च ॥ यथाप्रत्याम्नायेन यथाकालं करिष्ये ॥ तथा ॥
कुमारेणापि कामचारकामवादकामभक्षादिदोषापनोदार्थं कृच्छ्रत्रयं अमुकप्रत्याम्नायेन करिष्ये ॥ सुमुखश्चेत्यादिदेशकालौ स्मृत्वा ॥ पूर्वोच्च० तिथौ ॥
मम सकुमारस्य गर्भाधानपुंसवनसीमंतविष्णुबलिजातकर्मनामकरणउपवेशनान्नप्राशनचौलकर्मांतानां नवसंस्काराणां कालातिपत्तिदोषपरिहारद्वाराश्री० ॥ र्थे प्रायश्चित्तहोमं करिष्ये ॥ प्रतिसंस्कारं पादकृच्छ्रप्रायश्चित्तं तथात्र
चौलातिक्रमदोषपरिहारार्थं अर्धकृच्छ्रप्रायश्चित्तं अमुकप्रत्याम्नायेन करि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्ये॥ स्थंडिलादि आघारांतं अतीत क्रमे संख्यया व्याहृतिभिराज्याहुतीर्हुत्वा स्विष्ट
कृत्॥ अंतरितं चौलं उपनीयास सह॥ अस्य कुमारस्योपनयने ग्रहानुकूल्य सि
द्धि द्वारा श्रीपर॰ ग्रहयज्ञं करिष्ये॥ ग्रहयज्ञं समाप्य॥ अस्य कुमारस्य द्विजत्व सि
द्ध्या वेदाध्ययनाधिकारार्थं च उपनयनं करिष्ये॥ तदंगं गणपतिपूजनं स्वस्ति
वाचनं मातृका पूजनं नांदीश्राद्धं मंडप प्रतिष्ठां कुलदेवतादिस्थापनं च करि
ष्ये॥ स्वस्ति वाचनं नांदीश्राद्धं च कृत्वा॥ आचार प्राप्त मविघ्नसंज्ञं गणपतिं पू
जयित्वा॥ नंदिनी नलनी मैत्रा उमा च पशुवर्धिनी॥ भगवती मावाहयामि॥

उपनयनेन सह चौलकरणे पूर्वेद्युः संस्कारद्वयं संकीर्त्य उपनयनवत् स्वस्तिवाचनादि कृत्वा परेद्युः मंगलस्नानादि चौलकर्म कृत्वा॥

नंदिन्यादिभ्यो नमः।आसनादि॰आचमनीयं॰ ततो नीरांजनं॥ स्त्रियेजात॰॥
सुमंगलसूत्रेण हरिद्रोष्णोदकेन स्नापयित्वा॥ समुद्रज्येष्ठा इतिच तसृभिः
आपो हिष्ठेति तिसृभिः सर्वाः शुद्धोदकेन प्रोक्ष्य॥ दधिक्राव्ण इति दधि॰।
कांडात्कांडादिति दूर्वाः॥ गंधपुष्पधूपदीपनैवेद्यदक्षिणांतोपचारैः पूजये
त्॥ आग्नेयीमारभ्येशानीपर्यंतं मंडपस्थूणासु नंदिन्यादिचत्वारि देवताः
क्रमेण स्थापयेत्॥ तदस्तु मित्रा॰ ग्रहा वै प्रतिष्ठा॰ पुष्पांजलिं दत्वा॥ क्षमा
प्य॥ कुलदेवताप्रीत्यर्थं सुवासिनीभ्यः तैलहरिद्रादिदानं यथाचारं कार्यं॥ अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थापरेद्युः॥ कृतनित्यक्रिया॥ कृतमंगलस्नानमलंकृतंकुमारंमात्रासहभोजयित्वा॥
अस्यकुमारस्योपनयनंकर्त्तुंतत्पूर्वांगभूतंवापनादिकरिष्ये॥ ततःस्नातालंकृत्य
कुलदेवतांनमस्कृत्य॥ आचार्यसमीपमागत्यसम्यक्‌तन्मुखंनिरीक्षते॥ ततआ
चार्यःस्वदक्षिणभागेबटुमुपवेश्य॥ येयज्ञेनेतिब्रह्मणैःसहसूक्तंपठेयुः॥ ये
यज्ञेनदक्षिणया॰ देन्द्राकालौसंकीर्य॥ उपनयनांगभूतंस्थंडिलादिकरिष्ये॥
अग्निप्रतिष्ठापनांतंकृत्वा॥ पुनर्दैन्द्राकालौसंकीर्त्यअस्यकुमारस्यद्विजत्वसि
द्ध्यर्थंक्रियमाणेउपनयनहोमेदेवतापरिग्रहार्थंअन्वाधानंकरिष्ये॥ अग्नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्मिन्नन्वाहितेग्नावित्याद्याघारावाज्येनेत्यंतमुक्त्वात्रिरग्निंपवमानंप्रजापतिंचाज्ये
नशेषेणस्विष्टकृतमित्यादिसद्योयक्ष्यइत्यंतमुक्त्वाव्याहृतिभिरग्नावाधायपरिसमू
ह्यनाद्याज्यसंस्कारांतंकृत्वाचार्योग्नेःपश्चादवलरुत्थायकुमारंप्राङ्मुखमवस्थाप्यकौपीना
र्थेत्रिवृतंकार्पासंसूत्रंकट्यांबध्यकौपीनंपरिधाप्यद्वितीयजन्मन्युल्बस्थानिधिः
भूतमहतंसुरक्तंवासःसमंत्रंपरिधाप्य॥अन्येनकाषायवाससातथैवप्रावारयेत्॥त
त्रमंत्रः॥युवंवस्त्राणीत्यस्यऔचथ्योदीर्घतमामित्रावरुणौत्रिष्टुप्॥वासोधारणेवि०॥
ॐयुवंवस्त्राणिपीवसा०सकृत्॥प्रावरणार्थंकृष्णाजिनंवा॥तच्च॥मंत्रगुप्तंतुबहिर्लोमय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वास्याश्चतुरंगुलं ॥ अजिनंधारयेद्विप्रश्चतुर्विंशाष्टषोडशैः ॥ मित्रस्यचक्षुरित्यस्यवामदेवोऽज
६१ नंत्रिष्टुप् ॥ अजिनधारणे वि० ॥ ॐ मित्रस्यचक्षुर्धरुणंबलीयस्तेजोयशस्वीस्थविरंसमिद्धं ॥
अनाहनस्यंवसनंजरिष्णुपरीदंवाज्यजिनंदधेहं ॥ ततोद्विजस्त्वभिक्षार्थंयज्ञोपवीतंदद्या
त् ॥ यज्ञोपवीतमित्यस्यपरब्रह्मपरमात्मा त्रिष्टुप् ॥ श्रौतस्मार्तकर्मानुष्ठानसिध्यर्थंय
ज्ञोपवीतधारणे विनि० ॥ ॐ यज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात् ॥ आयुष्य
मग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तुतेजः इति मंत्रंवाचयित्वातद्दक्षिणबाहुमुद्धार्य ६१
उपवीतंधारयित्वाकुमारमात्मनोग्नेश्चमध्येनयज्ञपात्रोत्तरभागंगमयित्वातत्रविधिवदाचमय्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना

पुनस्तथैवानीयस्वदक्षिणत उपवेश्यबर्हिरास्तरणादिस्रुवसंमार्जनांतंकृत्वा
ब्रह्मचर्यमन्वारब्ध इध्मा धानादिआघारांतंकुर्यात्॥ ततः अग्न आयूंषीति
त्तिसृणांनृचांवैखानसाऋषयः अग्निः पवमानोदेवतागायत्रीछंदः उप
नयनप्रधानाज्यहोमो वि० प्रजापतेनत्व० यथाक्रमेणत्यागंकुर्यात्॥ आ
चार्यः उत्तरतोग्नेः प्राङ्मुखस्तिष्ठेत्॥ कुमारोपि अग्न्याचार्ययोर्मध्येनग
त्वा आचार्यस्याभिमुखस्तिष्ठेत्॥ ततः आचार्यः शुद्धोदकेनशिष्यांजलि
मापूर्यस्वस्यांजलिमन्येनपूरयित्वा॥ तत्सवितुः श्यावाश्वः सवितानुष्टुप्ः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६६ अवक्षारणे विनियोगः। ॐ तत्सवितुर्वृणीमहे अनेन स्वांजल्युदकं शि
ष्यांजलौ अवक्षार्य तज्जलं कुमारांजलिं नेवावक्षारयेत्॥ ततो बटोर्हस्तं
गृह्णीयात्॥ देवस्य त्वा स॰भ्यां॥ हस्तं गृह्णाम्यमुकशर्मन् इति कुमारस्या
भिवादनिकं नामशर्मांतं बुध्या निर्दिश्य स्वदक्षिणहस्ते कुमारस्य सांगु
ष्ठं दक्षिणपाणिं गृहीत्वा पुनरपि द्विवारं कुर्यात्॥ अत्र सविता ते हस्तम
ग्रभीत्॥ असावित्ति द्वितीयो हस्तग्रहणे मंत्रः अग्निराचार्यस्तव॰ तृती
यो हस्तग्रहणे मंत्रः॥ अथाचार्यः ब्रह्मचारिणा सह निष्क्राम्य। देवसवि ६६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तरे ॰ ॥ समामस्त इत्युक्त्वाचार्यब्रह्मचारिणमादित्यमीक्षयेत्त ॥ तत्त उभावपि
कुर्वंवत्त ॥ उत्तरत्तोग्ने रन्योन्याभिमुखस्तिष्ठत्तां ॥ अथाचार्यः ॥ कस्यब्रह्मचा
र्यसि ॰ प्राणस्यब्रह्मचार्यसि ॥ कस्त्वा कमुनयत्ते कायत्वा परिददामि ॰ ॥ इ
ति मंत्रंजपित्वा युवासुवासा इत्यस्यवैश्वामित्रिको विश्वामित्रो यूपस्त्रिष्टुप् ॰ पूर्वा
र्द्धर्चस्य प्रदक्षिणावर्त्तने उत्तरार्द्धर्चस्य पाणिभ्यां बटुहृदयमालंभने विनि ॰
ॐ युवासुवासाः तत्त आचार्यः आत्मानमग्निंचांतरेण बटुं नीत्वा स्वदक्षि
ण उपवेशयेत्त ॥ तत्तो बटुः समिदादाय ॰ अग्नये समिधमित्यस्य हिरण्य

गर्भो ग्निर्बृहती॰ समिदाधाने विनि॰ ॐ अग्नये समिध॰ वयं स्वाहा॥ अग्नय इदं॰
ततः पाणिं प्रक्षाल्याग्निमुपस्पृष्ट्वा॥ तेजसा मा समनज्मि इति संवृत्तोष्ठद्वयं मुख
मवाङ्गि॰ मृज्य पाणिं प्रक्षाल्य॥ तथैव द्विवारं कुर्यात्॥ ततस्तिष्ठन् मयि मेधामि
ति षण्णां हिरण्यगर्भ ऋषिः पूर्वत्रयाणामग्नीद्रसूर्यो देवताः उत्तरत्रयाणामअ
ग्निर्देवता॥ गायत्री छंदः॥ अग्न्युपस्थाने विनियोगः॥ मयि मेधां॰ मय्यग्निः॥ मयि
मेधां॥ मयीदं इं॰ मयि मेधां॰ सूर्यो॰ यत्ते अग्ने॰ तेजा यत्ते॰ अग्ने वर्चस्ते॰ यत्ते अ
ग्ने हरः॰ इति षण्मंत्रैरग्निमुपस्थाय॥ मानस्तोके कुसो रुद्रो जगती॥ विभूतिधार ६७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लेविनि०॥मानस्तोके० अनेनमंत्रेणभस्मादाययथाचारं त्र्यायुषंजमदग्ने
रितिललाटे॥कश्यपस्यत्र्यायुषंकंठे॥अगस्त्यस्यत्र्यायुषं नाभ्यां॥यद्देवानां
त्र्यायुषंदक्षिणांसे० तन्मेअस्तुत्र्यायुषंवामांसे॥शतायुषंमितिशिरसिभ
स्मधारयेत्॥पुनःपरिसमूहनपर्युक्षणेकृत्वाकृतांजलिस्तिष्ठन्॥ॐचमे
स्व०स्वस्तिश्रद्धांमेधांयशःप्रज्ञांविद्यांबुद्धिंश्रियंबलं॥आयुष्यंतेजआरो
ग्यंदेहिमे॥हव्यवाहनोंनमः॥इत्यग्निमुपस्थायअग्नेरुत्तरतोगत्वाप्राङ्मु
खीभूयाचार्याभिमुखोभूत्वादक्षिणंजानुंभूतलेनिधाय॥बाहुभ्यांयथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६९

सव्यदक्षिणैः श्रोत्रे संस्पृश्य व्यस्तपाणिराचार्यस्य दक्षिणपादं स्वदक्षिणहस्ते
न सव्यं च सव्यहस्तेन जानुप्रभृति पादपर्यंतं स्पृष्ट्वा अमुकगोत्रोमुकशर्माहं
भो गुरो अभिवादयामीत्युच्चार्य नम्रशिरा एवं नतिपूर्वकमभिवाद्य आचार्येणा
युष्मा॰ भव सौम्य देवदत्ता ३ अत्र मनुराह। आयुष्मान्भव सौम्येति वाच्यो विप्रो
भिवादने॰ सावित्र्युपदेशं वा छंदः अधीहि भोः सावित्रीं भो अनुब्रूहीति बटु
रनुब्रूयात्। ततो आचार्यस्य वाससा पाणिभ्यां च संगृह्य सावित्रीमन्वाह।
तत्र कारिका॥ ॐ भूर्भुवः स्वः पूर्वां तु सावित्रीं वाचयेद्यथा। पादं पादं च सावि

६९

च्या: स्वयमुक्त्वैव वाचयेत्॥ ततस्त्वर्द्धर्चेमर्धर्चं सर्वोत्तामथवा वाचयेत्॥ एवं व
त्तु मन्त्रान्कृत्स्नं यथाशक्ति वाचयेत्॥ प्रणवस्य परब्रह्म ऋषि: परमात्मा देव
ता। दैवी गायत्री छंद: व्याहृतीनां प्रजापति: प्रजापतिर्बृहती॥ गायत्र्या विश्वा
मित्र: सविता गायत्री। उपनयने वि०॥ तत: गायत्रीं वाचयित्वा ममव्रतेऽ
स्यस्य प्रजापतिर्ऋषि: बृहस्पतिर्देवता॥ त्रिष्टुप्छंद: बटोर्हृदये ऊर्ध्वांगुलिं।
पाणिं निधापने वि०। मम व्रते हृ० मेखलां बध्नीयात्॥ इयंदुरुक्तादिति द्व।
यो: वामदेवो मेखला त्रिष्टुप् मेखलाबंधने विनि०॥ इयं दुरुक्तात्परिबा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६१

धमाना शर्म वरूथं पुनती न आगात्॥ प्राणापानाभ्यां बलमाभरंती प्रियादेवानां सु
भगा मेखलेयं ॥ ऋतस्य गोप्ती तपसः परस्पी घ्नती रक्षः सहमाना अरातीः ॥ सा नः
समंतमनुपरीहि भद्रया भर्तारस्ते मेखले मा रिषामेति वाचयित्वा मेखलां त्रिवर्ये
नाभिदेशे ग्रंथि त्रयं कुर्यात्॥ पालाशं दंडं दद्यात्॥ स्वस्ति नः स्वस्त्यात्रेयो वि
श्वेदेवास्त्रिष्टुप्॥ दंडदाने वि॰॥ स्वस्ति नो मिमी॰ अदांतं दमयित्वा मां मार्गे तद्रूहलगमं
स्वस्त्याप यन्त्वयं॰ दंडः करे स्थितो यस्मात्तस्माद्रक्ष यत्नोभर्मिति वाचयेत्॥ यं २
ततः कुमारस्याचारमादिशेत्॥ ब्रह्मचार्यसि आचमनं कुरु॰॥ मूत्रपुरीषा॥

६१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वे शुध्यर्थे मित्यर्थः। कर्मकुरु संध्योपासनादीत्यर्थः॥ दिवा मास्वा दिवा निद्रां न
कुरु वर्त्तेत्यर्थः॥ आचार्याधीनो वेदमधीष्व। सायंप्रातर्भिक्षेथाः सायंप्रातः स।
मिधमाधेहि। द्वादशवर्षाणि वेदग्रहणं तं ब्रह्मचर्यं चरेति प्रैषार्थानू बोधये
त्॥ ततः स्विष्टकृतं हुत्वा होमशेषं समाप्य। अग्निं मेधाजननं तरक्षेत्॥ भि
क्षापात्रमादाय। आदौ मातरं भवती भिक्षां ददातु॥ अथवा पितरं भवानू
भिक्षां ददातु। एवं रूपां भिक्षां याचयेत्॥ आचार्याय निवेदयेत्॥ कृतस्य
उपनयनस्य सांगतासिध्यर्थं द्वेशते त्रिंशतं वा ब्राह्मणान्भोजयिष्ये। ततो ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नानामगोत्रेभ्यो ब्राह्मणेभ्य भूयसीं दातुमहमुत्सृजे ।। ततो गुरुः संनिधावचलन्स्तिष्ठ
न्नहः शेषं नीत्वा सायं वदित्त संध्यः औपनायनिकाग्नेरंतिकमासीनः प्राणानाय
म्य सायमग्निकार्यं करिष्ये इति संकल्प्य परिसमुह्य पर्युक्ष्य पूर्ववत्समिधापत्ति
र्मुखं पूर्ववदग्निमज्य उत्कृष एमं त्रैरुपस्थाय मानस्तोक इति भस्मादाय त्र्यायुष
मिति तत्तस्थाने पूर्ववद्धुत्वा पुनः समूहन पर्युक्षणे कृत्वा कृतांजलिस्तिष्ठन्नू
ॐ चमइ इति उपतिष्ठेत् ।। आचार्यो स्तभित्तेग्नः पश्चात्स्वासीनः प्राणानाय
म्य तिथ्यादिसंकीर्त्य उपनयनांगभूतं अनुप्रवचनीयहोमं करिष्ये ।। अस्मि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नन्वाहितेग्नावित्यादिः आघारावाज्येनेत्यंतमुक्त्वा सदसस्पतिं सवितारं ऋषीन्
प्रधानदेवताश्च रुद्रं ब्येणग्नो षण स्विष्टकृत्तमित्यादि सद्योयक्ष्ये॥ द्वे समिधमग्ना
वाधाय। चौलोपनीतेस्य खिलव्रतेषु ब्रह्मौदने दारपरिग्रहे च॥ स्नानेच गोदान
विधौच संर्वे नैवाज्यभागौ प्रवदंतिसंतः॥ इतिज्ञात्वा॥ ततः परिसमूहनादि
प्रणीताप्रणयंतांतंकृत्वा॥ तद्धिक्षाद्रव्यं चतुरश्चतुरो मुष्टीस्तूष्णीं देवतात्रय
स्य विप्रत्रयभोजनपर्याप्तं निरूप्यतथैव प्रोक्ष्यत्रिः फलीकृत्य प्रक्षाल्य श्रप
यित्वा शृतस्थालीपाकं आचार्याय निवेदयेत्॥ बटुः॥ ततो ब्रह्मचारिणान्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रध्वो गुरु राज्यसंस्कारादि आघारांतं कृत्वा होमं कुर्यात्॥ अवदानधर्मेण वदाय॥ सद
सस्पतिमितिमंत्रस्य मेधातिथिः॥ सदसस्पतिर्गायत्री॥ अनुप्रवचनीयप्रधानचरुहो
मविनियोगः॥ ॐ सदसस्पतिमद्भुतं॰ सदसस्पतय इदं॰ तत्सवितुर्विश्वामित्रः सवि
ता गायत्री॥ अनुप्रवचनीय॰ तत्सवितु॰॥ सवित्र इदं॰ ऋषिभ्यः स्वाहा ऋषिभ्य इदं॰॥
स्विष्टकृदादिहोमशेषं समाप्य॥ तद्वच्छिष्टान्नेन त्र्यवरान् ब्राह्मणान्भोजयित्वा
तैर्वेदसमाप्तिं वाचयेत्॥ ततः ब्रह्मचारी अक्षारलवणमन्नं भुक्त्वाधः शयीत॰
॥ ॥इत्यनुप्रवचनीयहोमः॥ ॥ यदा गर्जाघनध्यायन्नां कृतदादिवैवचवहंस्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

११येत्॥ होमस्तु सायंसंध्योत्तरमेव॥ ॥अथ मेधाजननं॥ ॥स्वगृहे निमेरव
लंवेदिं कृत्वा तत्र समूलं पलाशशाखां कुशस्तंबं वा प्रतिष्ठाप्य पूजयेत्॥ तत्र क्र
मः तिथ्यादि संकीर्त्य मम कुमारस्य उपनयनव्रतसमाप्तियावत्सेके तु मोद
कमिश्रमन्नं निवेद्य पुनश्च पूर्ववदभ्यर्च्य॥ वेदग्रहणसामर्थ्यलक्षणमे
धासिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं मेधाजननाख्यं कर्म करिष्ये॥ यथाचारं
स्वस्तिवाचनं कृत्वा पूर्वोक्तफलसिध्यर्थं मेधापरनामक सावित्रीपूजां करिष्ये॥
पलाशशाखायां मेधायै नमः॥ इति नाममंत्रेण वाहनाद्युपचारैः पूजयि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्वेवमहं मनुष्याणां वेदस्य निधिपो

त्वा॥ ब्रह्मचारिणा प्रणम्य शुद्धजलपात्रोदकेन सेचनं कुर्वता बटुनात्रिः प्रद
क्षिणं कारयेत्॥ मंत्रं वाचयेत्॥ ॐ सुश्रवः सुश्रवा असि यथा त्वं सुश्रवः।
सुश्रवा अस्येवं मां सुश्रवः सौश्रवसं कुरु॥ यथा त्वं देवानां यज्ञस्य निधि
पौ भूयासं॥ प्रतिप्रदक्षिणं मंत्रावृत्तिः॥ प्रणामं च कारयेत्॥ ततो ब्रह्मचा
री स्नात्वा नवीन पूर्ववद्यज्ञोपवीतादीनि मंत्रेण धारयेत्॥ पुराणानि प
त्राणि संनिधौ विसृज्य गुरवे दत्वा मेधामह्यममिति सूक्तं विप्रैः पठित्वा॥ मे
धामह्यमंगिरसो मेधां सप्तऋषयो दुदुः मेधामिंद्रश्चाग्निश्च मेधां धाता द

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दातु मे । मेधां मे वरुणो राजा मेधां देवी सरस्वती ।। मेधां मे अश्विनौ देवाधत्तां
पुष्करस्रजा ।। यां मेधा अ[illegible]प्सरासु गंधर्वेषु च यन्मनः ।। देवी या मानु
षी मेधा सा माया विशतादिमां ।। यन्मे नोक्तं प्रडुवत्तां शकेयं यदनुब्रु
वे ।। निशामितं निशामहे मयि प्रियं सह व्रत्तैः नभूयासं ब्रह्मणा संगमे
महि ।। शारीरं मे विचक्षणं वा[illegible]ङ्मे म[illegible]धुमद्दुहा । अहृद्ध महमसौ सूर्यो
ब्रह्मणानी [illegible]स्थः श्रुतं मे मा प्रहासीत् ।। मेधां देवीं मनसा रेजमानां गंधर्व
जुष्टां प्रतिनो जुषस्व । मह्यं मेधां वद मह्यं श्रियं वद मेधावी भूयासमजरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जरिष्णुःसदसस्पतिमद्भुतंप्रियं॰यांमेधांदेवगणाःपितरश्चोपासते।
तयामामद्यमेधयाग्नेमेधाविनंकुरु।।मेधाव्यं१हंसुमनाःसुप्रतीकः
श्रद्धामनाःसस्यमुत्तिःसुशेवः।महायशाधारयिष्णुः॥प्रवक्ताभूयासम
र्थेस्वधयाप्रयोगे।। ।।इतिमेधाजननं।। ।।समेचदिवसेकुर्याद्देवको
त्थापनंबुधः।।षष्ठंचविषमंनेष्टंमुक्त्वापंचमसप्तमौ।।उक्तकालेमंडपां
तःसपत्नीकःस्वासनेउपविश्य।।आचम्यप्राणानायम्यतिथ्यादि
संकीर्त्यउपनयनांगत्वेनस्थापितदेवतानामुत्थापनंमंडपोद्वासनं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रातरग्निकार्यं कृत्वा प्राणानायम्य॰ तिथ्यादिसंकीर्त्य मम ग्रहस्थाद्याश्रमां
तरप्राप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं समावर्त्तनं करिष्ये॥ तदंगं गणपति
पूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं च कृत्वा उत्तरलक्ष
णां समिधमात्मन्यो परि निदध्यात्॥ ब्रह्मचर्यव्रतपरिपूरणार्थं गोनिष्क्रि
यभूतं यथाशक्तिद्रव्यं यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृजे॥ करि
ष्यमाणसमावर्त्तनांगभूतं यथाशक्ति ब्राह्मणभोजयिष्ये॥ ततः स्थंडिला
दि अग्निप्रतिष्ठापनांते॰ ममान्क्रियमाणे समवर्त्तनहोमे देवत्तापरिग्रहार्थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८१

मन्वाधानं करिष्ये ।। अस्मिन्नन्वाहितेऽग्नौ इध्माघाघारावाज्येनेत्यंतमुक्त्वाग्निरग्निं प
वमानं प्रजापतिं चाज्यद्रव्येण अग्निमूर्ध्वे समिधा विश्वान्देवान् दशो समिद्भिः
शेषेण स्विष्टकृतमित्यादि पूर्णपात्रनिधानांतं पुरस्तन तंत्रं अनुष्ठायोदगग्नेरा
स्तीर्णेषु दर्भेषु व्रीहियवमाषतिलैः पृथक् पूरितानि चत्वारि न्नारणवा[redacted]णि क्रमेणै
कैकशः ।। प्राक्संस्थान्यासादयेत् ।। नामत्रमयं लोहं वा स्फुरं । शीतमुष्णं चोद
कं नवनीतं मणिं इत्येकादश द्रव्याणि चाग्नेरुत्तरतः आसादयेत् ।। अग्नेर्दक्षि
णदिग्भागे एकस्मिन्शरावे शमीपर्णानि ।। अपरस्मिन्नानडुहं गोमयमासा ८४

दयेत्त।। ब्रह्मैकविंशत्तिकुशांकुरान्दधानो दक्षिणत्तस्तिष्टेत्।। तत्तो ब्रह्मचारीपु
रस्तं नत्तंत्रमाघारांतं कृत्वा अग्न आयूंषीत्तित्तिसृभिः प्रजापत्तेन त्वदित्तिहु
त्वा तत्तः शीत्तोष्णाभिरद्भिः उष्णेन वाय उदकेनेहीत्तिधाराद्वयंपात्रां तत्तेरधं
त्वा नवनीत्तेन उदकमिश्रेण वा श्मश्रुमारभ्य प्रदक्षिणं अदित्तिः श्मश्रूणि
वपत्वाप उंदंत्तु वर्चसे।। इत्तिमंत्राभ्यां त्रिवारं कुंदयेत्त। स्वहस्तस्थित्तेषु एकवि
शत्तिकुशांकुरेषु त्रीन्कुरानादाय।। दक्षिण श्मश्रुभागे ब्रह्मचार्यभिमुखं पश्चि
माग्रं निदध्यात्त्।। ओं ओषधे त्रायस्व मां इत्तिवदेत्त्। तत्तो ब्रह्मा त्तेषु कुशांकुरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुष्करे निदध्यात्॥ तदा ब्रह्मचारी॰ स्वधिते मा मा हिंसीः येनावपत्सविता॥
इति जपेत्॥ ततो ब्रह्मा॰ सश्मश्रुकानां कुरन् छित्वा नृत्ताभीपर्णैः सहैकी कृत्य ब
टोः करे दद्यात्॥ आनडुहे गोमये निदध्यात्॥ एवं द्वितीयादिछेदने समं
त्रकं कार्यं। येन धाता॥ इति द्वितीयं येन भूयश्च॰ इति तृतीयं। चतुर्थे तु॰।
एतैर्मंत्रैश्छेदनं कार्यं॥ एवमुत्तरस्मश्रुपदेशे त्रिवारं छेदयेत्। न तु सर्वै
र्मंत्रैश्चतुर्थं॥ यत्क्षुरेण मर्चयता सुपेशसा वप्ता वपसि स्मश्रूणि शुंधि शि
रो मुखं मा म आयुः प्रमोषीः क्षुरधारां निमृजेत्॥ नृत्ताभिः कुरु। प्रेषा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्थं चावबोध्य॰ शीतोष्णांबुभिः केशश्मश्रुलोमनखानि उदक्संस्थानि वापयि
त्वा तद्व्रीह्यादिन्नाएव चतुष्टयं नापिताय दद्यात्॥ ततः करंजबीजपीष्टेन
स्वशरीरमुद्वर्त्य शीतोष्णैरुदकैः स्नात्वा। द्विराचम्य। पुनर्वह्नेरंतिकं गत्वा
एकं वस्त्रं समंत्रकं परिधाय। अन्यद्वस्त्रं प्रावृण्यात्॥ युवं वस्त्राणि॰ ततो
द्विराचम्य॥ पाणिनांजनमादाय। ॐ अश्मनस्तेजोसि चक्षुर्मेपाहि॰
मंत्रावृत्त्या सव्यदक्षिणे चक्षुषी क्रमेणांक्त्वा तथैव ॐ अश्मनस्तेजोसि
श्रोत्रं मेपाहि॰ कुंडलाभ्यां दक्षिणसव्ये श्रोत्रेलंकृत्य कुंकुमाद्यनुलिप्ताभ्यां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाणिभ्यां पूर्वं मुखमनुलिप्य पश्चादितरांगानि ॥ कुरौ प्रक्षाल्य ॐ अनार्तास्यना
र्त्तौ हं भूयासं · शिरसि । स्रजं बध्वा । देवानां प्रतिष्ठस्थः सर्वतो मा पात्तं । उपान
हौ · दक्षिणसव्यपाणिभ्यां पादाभ्यामारुह्य · दिवश्छद्मासि · इति मंत्रेण छ
त्रं । वैणवरसि वानस्पत्योसि सर्वतो मा पाहि · वैणवं दंडं गृहीत्वा ॥ आयुष्यमि
ति सूक्तस्य सनकसनंदनसनातनऋषयः हिरण्यदेवताः आद्याश्चतस्रो
नुष्टुभः पंचमी त्रिष्टुप् षष्ठ्यनुष्टुप् · सप्तमी शाक्वरी · अष्टमीनवम्यौ त्रिष्टु
भौ · दशम्यनुष्टुप् · एकादशी जगती · कंठे मणिधारणे विनियोगः ॥ ॐ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आयुष्यं वर्च्चस्यं रायस्पोषमौद्भिदं॰ इदं हिरण्यं वर्च्चस्वज्जैत्रायाविशतादिमां।
उच्चैर्वाजिप्तनाषाट्सभासाहंधनंजयं॥ सर्वाः समग्राऋद्धयो हिरण्येस्मि
न्त्समाहिताः॥ शुनमेहंहिरण्यस्वपित्तुर्मानेवजग्रभ॥॰ तेनमांसूर्यत्वच
मकरंपूरुषुप्रियंसम्राजंचविराजंचाभिश्रियाचमेध्रुवा॥लक्ष्मीराद्धस्य
यागृहेत्तयामामिंद्रसंसृज्ज॥ अग्नेः प्रज्ञातंपरियद्धिरण्यममृत्तंयज्ञेअधि
मर्त्तेषु॥ यएनद्वेदसइदेनमर्हेत्तिज्जरामृत्स्यर्भवत्तियोबिभर्त्ति। यद्वेदरा
ज्ञोवरुण्णोयद्दुदेवीसरस्वत्ती। इंद्रोयद्वृत्रहावेदतन्मेवर्चसआयुषे॰ नेत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रक्षांसि न पिशाचाश्च रंति देवानामोजः प्रथमजं ह्येऽ तत्।। यो बिभर्ति दाक्षाय
णं हिरण्यं स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः।। यदाब
ध्नन्दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः। तन्म आ बध्नामि शत
शारदायायुष्मान्जरदष्टिर्यथासत्।। घृतादुल्लुप्तं मधुमत्सुवर्णं धनंजयं।
धरुणं धारयिष्णु।। ऋणक्सपत्नादधरांश्च कृण्वदारोह मां महते सौभगा
य।। प्रियं मा कुरु देवेषु प्रियं राजसु मा कुरु।। प्रियं विश्वेषु गोप्तेषु मयि धेहि रुचा
रुचं।। अग्निर्येन विराजति सूर्यो येन विराजति। विराज्येन विराजति तेनास्मा ८७

ब्रह्मणस्पते विराजसमिधं कुरु॥ अनंतरं॥ उष्णीषेण प्रादक्षिण्येन शिरः संवेष्ट्य उ
पानहौ संत्यज्य उपरि निहितां प्रागुक्तां समिधं गृहीत्वा तिष्ठन्नेव॰ एषां मंत्राणां
प्रजापतिरग्निरृष्टिः॥॰ समिदाधाने वि॰ स्मृतं च मे तन्मा उभव्रतं॰ निंदा च मे॰ अग्निं
दा च मे॰ विद्या च मे अविद्या च मे श्रद्धा च मे अश्रद्धा॰ प्रज्ञा च मे अप्रज्ञा॰ इष्टं च मे
अनिष्टं च मे। दत्तं च मे अदत्तं च अधीतं च मे अनधीतं च॰ कृतं च मे अकृतं॰ स
त्यं च मे असत्यं च मे। श्रुतं च मे अश्रुतं॰ व्रतं च मे अव्रतं॰ यदग्ने सेंद्रस्य सप्रजा
पतिकस्य सऋषिकस्य सऋषि राजन्यस्य सपितृकस्य सपितृराजन्यस्य स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनुष्यस्य समनुष्यराजन्यस्य साकाशस्य सातीकाशस्य सानूकाशस्य सप्रती
काशस्य सदेवमनुष्यस्य सगंधर्वाप्सरसस्य सहारण्यैश्च पशुभिर्ग्राम्यैश्च
यन्मा आत्मन आत्मनि व्रतं तन्मे सर्वं व्रतमिदमहमग्ने सर्वव्रतो भवामि स्वा
हा ॥ अथोपविश्य ॥ अन्याः प्रादेशसमिता दश समिधः ममाग्ने वर्चो इति सू
क्तस्य ॥ विहव्य ऋषिः विश्वेदेवा देवता ॥ त्रिष्टुप् छंदः अंत्या जगती ॥ समिदाधाने
विनियोगः ॥ प्रत्यृचं त्रगते ग्नावादध्यात् ॥ ममाग्ने वर्चो ० त्र ० १ सर्वत्र विश्वेभ्यो
देवेभ्य इदं ॥ ततः स्विष्टकृदादि होमशेषं समापयेत् ॥ ततः स्नातको नैमित्ति ८८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कं विनानत्कं न ग्रस्च नस्नायात्॥ नग्नां स्त्रियं नेक्षे· वर्षति न धावामि· वृक्षं
नारोहामि। कूपं नावरोहामि। प्राणस्य संत्रायं नाभ्यापद्येत· इत्येवं क
ल्पयेत्॥ ततः कौपीनं मेखलां च विसर्जेत्॥ ततोयत्र मधुपर्कादि पूजास्य
संभाविता तत्रैतां रात्रिं वसेत्॥ समावर्तनांतरं त्रिरात्रमाशौचं कुर्या
त्॥ ॥इतिसमावर्तनं॥ ॥अथक्रमप्राप्तो विवाहः॥ ॥अनाश्रमी
न तिष्ठेत्त दिनमेकमपि द्विजः॥ आश्रमेण विना तिष्ठन् प्रायश्चित्ती
यते हि सः इति दक्षस्मृतेः अथ मुख्य ब्राह्म विवाहांगमूहुर्ते वाग्दान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विधिर्गृह्य परिशिष्टा संमर्यौ च्यते। ततो वरपित्रादि गंधाक्षत शुभ वस्त्रयुग्म
भूषण तांबूल पुष्पादिभिः कन्यां पूजयेत् संप्रदाया गतैर्मंत्रैः। ततः कन्या
दाता प्राङ्मुखः कन्या वामतः उपविश्याचम्य देशकालौ संकीर्त्य करिष्य
माण विवाहांगभूतं वाग्दानमहं करिष्ये॥ वरपितापि॥ वरविवाहांगभू
तं कन्या निरीक्षणमहं करिष्ये॥ ॥इतिसंकल्पं कुर्यात्॥ ॥उभौ गणप
तिपूजनमहं करिष्ये॥ ततः दक्षिणांते रूपचारैर्गणपतिं वरुणपू
जनं कलशप्रार्थनां कृत्वा॥ कन्यां पूजयेत्। गंधतांबूलादिना। गंध ८०
फलैः कन्यापूजनमंत्र २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वारे॰ श्रियेजातः॰ नीराजनं॰ युवंवस्त्राणि॰ वस्त्रपुष्पाणि॰ हिरण्यरूपः॥
आयुष्यमितिमुद्रिकाभूषणाद्यलंकृत्य वाग्दानं कुर्यात्॥ भो पंच दृढं पूगीफ
लानि हरिद्राखंडसहितानि हस्ते गृहीत्वा कन्यापिता वरगोत्रमुच्चार्य।
अमुकप्रवरान्वितामुपगोत्रोत्पन्नायामुकप्रपौत्रायामुकपौत्रायामुकपुत्रा
यामुकनाम्नेवरायामुपप्रवरोपेताममुकगोत्रोत्पन्नाममुकप्रपौत्रीममु
कपौत्रीममुकपुत्रीममुकनाम्नीं कन्यां ज्योतिर्विदादिष्टमुहूर्ते दास्ये वस्त्रप्रां
ते बध्वा॰ तदस्तु॰ गृहाणैव प्र॰ ग्रंथिगंधादिनार्चयेत्॥ अव्यंगे पतिते क्लीबे

स्वस्थानेकन्यापूजयित्वा वरमुपवेश्य
तेषां वचोयां प्रत्यङ्मुखमुपविश्य तं गंध
तांबूलदानादिना पूजयेत्तदातारः

दत्तादोषविवर्जिते॥ इमां कन्यां प्रदास्यामि देवाग्निद्विजसंनिधौ॥ तथैवपि
त्रादिनापंचपूगफलानि गृहीत्वामुकगोत्रामुकवरविषये भवंतोनिश्चि
ताभवंतु। दातृवस्त्रप्रांते प्रक्षेपादिकुर्यात्॥ ततोदाता॥ वाचादत्ताम
